श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गरुडाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गरुडाष्टोत्तरशतनामस्तोत्रम् ॥

श्री देव्युवाच -
देवदेव महादेव सर्वज्ञ करुणानिधे।
श्रोतुमिच्छामि तार्क्ष्यस्य नाम्नामष्टोत्तरं शतम् ॥

ईश्वर उवाच -
शृणु देवि प्रवक्ष्यामि गरुडस्य महात्मनः।
नाम्नामष्टोत्तरशतं पवित्रं पापनाशनम् ॥

अस्य श्री गरुडनामाष्टोत्तरशतमहामन्त्रस्य,
ब्रह्मा ऋषिः,
अनुष्टुप् छन्दः,
गरुडो देवता,
प्रणवो बीजं,
विद्या शक्तिः,
वेदादिः कीलकम्,
पक्षिराजप्रीत्यर्थे जपे विनियोगः ॥

ध्यानम्

अमृतकलशहस्तं कान्तिसम्पूर्णदेहं
सकलविबुधवन्द्यं वेदशास्त्रैरचिन्त्यम्।
कनकरुचिरपक्षोद्धूयमानाण्डगोलं
सकलविषविनाशं चिन्तयेत् पक्षिराजम् ॥

ओं वैनतेयः खगपतिः काश्यपोऽग्निर्महाबलः।
तप्तकाञ्चनवर्णाभः सुपर्णो हरिवाहनः॥ 1 ॥

छन्दोमयो महातेजा महोत्साहो महाबलः।
ब्रह्मण्यो विष्णुभक्तश्च कुन्देन्दुधवलाननः॥ 2 ॥

चक्रपाणिधरः श्रीमान्नागारिर्नागभूषणः।
विज्ञानदो विशेषज्ञो विद्यानिधिरनामयः॥ 3 ॥

भूतिदो भुवनत्राता भूशयो भक्तवत्सलः।
सप्तच्छन्दोमयः पक्षी सुरासुरसुपूजितः॥ 4 ॥

गजभुक् कच्छपाशी च दैत्यहन्तारुणानुजः।
अमृतांशोऽमृतवपुरानन्दनिधिरव्ययः॥ 5 ॥

निगमात्मा निराहारो निस्त्रैगुण्यो निरव्ययः।
निर्विकल्पः परं ज्योतिः परात्परतरः परः॥ 6 ॥

शुभाङ्गः शुभदः शूरः सूक्ष्मरूपी बृहत्तनुः।
विषाशी विदितात्मा च विदितो जयवर्धनः॥ 7 ॥

दार्ढ्याङ्गो जगदीशश्च जनार्दनमहाध्वजः।
सतां सन्तापविच्छेत्ता जरामरणवर्जितः॥ 8 ॥

कल्याणदः कलातीतः कलाधरसमप्रभः।
सोमपः सुरसङ्घेशो यज्ञाङ्गो यज्ञभूषणः॥ 9 ॥

महाजवो जितामित्रो मन्मथप्रियबान्धवः।
शङ्खभृच्चक्रधारी च बालो बहुपराक्रमः॥ 10 ॥

सुधाकुम्भधरो धीमान् दुराधर्षो दुरारिहा।
वज्राङ्गो वरदो वन्द्यो वायुवेगो वरप्रदः॥ 11 ॥

विनतानन्दनः श्रीदो विजितारातिसङ्कुलः।
पतद्वरिष्ठः सर्वेशः पापहा पापनाशनः॥ **12** ॥

अग्निजिज्जयघोषश्च जगदाह्लादकारकः।
वज्रनासः सुवक्त्रश्च मारिघ्नो मदभञ्जनः॥ **13** ॥

कालज्ञः कमलेष्टश्च कलिदोषनिवारणः।
विद्युन्निभो विशालाङ्गो विनतादास्यमोचनः॥ **14** ॥

स्तोमात्मा च त्रयीमूर्धा भूमा गायत्रलोचनः।
सामगानरतः स्रग्वी स्वच्छन्दगतिरग्रणीः॥ **15** ॥

इतीदं परमं गुह्यं गरुडस्य महात्मनः।
नाम्नामष्टोत्तरशतं पवित्रं पापनाशनम्।
स्तूयमानं महादिव्यं विष्णुना समुदीरितम्॥ **16** ॥

॥ इति श्री गरुडाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥